International Journal of Sanskrit Research 2022; 8(1): 147-155

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(1): 147-155
© 2022 IJSR
www.anantaajournal.com
Received: 05-11-2021
Accepted: 26-12-2021

**डॉ. रघुनाथ नेपाल**
लब्धविद्यावारिध्युपाधिकः
उपप्राध्यापकः,
विश्वविद्यालयविद्यापीठस्य नेपालसंस्कृतविश्वविद्यालयान्तर्गतस्य नेपालस्थस्य, नेपालः

Corresponding Author:
**डॉ. रघुनाथ नेपाल**
लब्धविद्यावारिध्युपाधिकः
उपप्राध्यापकः,
विश्वविद्यालयविद्यापीठस्य नेपालसंस्कृतविश्वविद्यालयान्तर्गतस्य नेपालस्थस्य, नेपालः

# न्यायसिद्धान्तमञ्जरीग्रन्थदिशा प्रमाणानुशीलम्

**डॉ. रघुनाथ नेपाल**

**सारः**

न्यायसिद्धान्तमञ्जरीग्रन्थदिशा प्रमाणानुशीलनरूपेऽस्मिन्नालेखे ग्रन्थकारोक्तदिशा प्रमाणस्वरूपमनुशीलितमस्ति। प्रमाणविषयकं चिन्तनमस्य ग्रन्थकारस्य विदुषो जानकीनाथस्य कीदृशमस्तीति नैतावत्केनाप्यनुसन्धितमस्ति। अतो ग्रन्थकारोक्तदिशा प्रमाणसामान्यं परिशील्य क्रमशः प्रत्यक्षानुमानोपमानशब्दाख्यानि प्रमाणानि परिशीलितानि। तत्र प्रत्यक्षप्रमाणनिरूपणप्रसङ्गे समागतानि प्रत्यक्षप्रमास्वरूप–करणकारणस्वरूप–निर्विकल्पकसविकल्पकप्रत्यक्षभेद–इन्द्रियभेदजन्यचाक्षुषादिप्रत्यक्षभेद–संयोगादिसन्निकर्षभेदस्वरूपादीनि सलक्षणं विश्लिष्यानुशील्य च, अनुमानपरिच्छेदेऽप्यनुमितिस्वरूपम्, परामर्शस्वरूपम्, व्याप्तिस्वरूपम्, अनुमानभेदश्चोक्त्वा हेत्वाभासाः, प्रतिज्ञाद्यवयवाश्च विश्लिष्टाः, तदन्वनुशीलिताश्च। एवमेवोपमानस्वरूपविश्लेषणपूर्वकमनुशील्य तदनु शब्दप्रमाणविषयकमनुशीलनं विश्लेषणपूर्वकं गहनतया विहितमस्ति। ग्रन्थकारेण प्रतिपादितानां प्रमाणसम्बन्धिविविधविषयाणां सूक्ष्मेक्षिकयानुशीलनार्थं सयुक्तिकेन विश्लेषणविधिना निष्कर्षः स्थापितो वर्तते। मन्येऽहमनेनापूर्वलघ्वनुसन्धानकार्येण प्रमाणविषयकाध्ययने, न्यायसिद्धान्तमञ्जरीग्रन्थाध्ययने च रुचिमतां जिज्ञासूनां महानुपकारो भवेदिति।

**विशेषशब्दाः** आन्वीक्षिकी, प्रमाणम्, प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दः

## १. विषयप्रवेशः

आन्वीक्षिकीत्रयीवार्तादण्डनीतिश्च शाश्वती इत्यादिशास्त्रप्रामाण्यादिमा आन्वीक्षिक्यादयश्चतस्रो विद्या लौकिकाभ्युदयाय निःश्रेयसे चात्यन्तमुपयोगिन्यः प्राणभृतां कृते। अतः प्राचीनकालादेवैतासां चतसृणां विद्यानां प्रवृत्तिरभूल्लोके। तत्र ऋग्यजुसामभेदेन विभक्ता त्रयीविद्या ब्रह्मज्ञानां ब्राह्मणानां तत्त्वज्ञानार्थं प्रवृत्ता चेत् दण्डनीतिरूपा राजविद्या राष्ट्रसंरक्षणाय प्रजापालनाय च क्षत्रियाणां शासकानां कृते समागता। तथैव वार्ताख्या कृषिवाणिज्यादिविद्या, अर्थशास्त्रापरनाम्नी वैश्यानां समाजपरिपोषकानां कृते उपयोगिनी, यया सर्वेऽपि प्राणिनः लौकिकं समृद्धं जीवनं यापयितुं शक्नुवन्ति। एवमेव चतुर्थीयमान्वीक्षिकीविद्या शूद्रादिसहितानां सर्ववर्णानां सर्वजनानां कृते लौकिकालौकिकाभ्युदयप्राप्तये समर्था वर्तते। यतोहि सर्वेऽपि जनाः धर्मार्थम्, अर्थार्थम्,

कामार्थम्, मोक्षार्थञ्च यदा प्रवर्तन्ते, तदा प्रथमन्तावत् भवति सन्देहावसरः। सर्वसु कर्मसु, सर्वासु विद्यासु, सर्वेषु धर्मेषु च यथार्थनिश्चयं विना प्रयोजनावाप्तिर्न सम्भवति। अतस्तदर्थं सर्वत्रान्वीक्षा अर्थादापाततो दर्शनानन्तरं सन्देहनिवारणाय सम्यगीक्षणं कर्तव्यम्। अन्वीक्षां विना न कोऽपि जन आत्मविश्वासपूर्वकं लौकिकं किमपि कर्मकर्तुं न शक्नोति। तथैव परलोकसम्बन्धिनमामुष्मिकमपि चिन्तनमन्वीक्षयैव भवति। विभिन्नेषु शास्त्रेषु निरुक्तानां विविधानां विषयाणां निश्चयश्चान्वीक्षापूर्वकमेव कर्तुं शक्यते। अत एवान्वीक्षया प्रवृत्तेयमान्वीक्षिकीविद्या सर्वत्र सर्वेषां कृते उपयोगिन्यावश्यकी च वर्तत इति निश्चप्रचम्। तदुक्तं भाष्यकारेण–

प्रदीपः सर्वविद्यानामुपायः सर्वकर्माणाम्। आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तिताः।। (वात्स्यायनः, पृ.१२)

इयमेव विद्या कालान्तरे हेतुविद्या, न्यायविद्या, तर्कविद्येत्यादिनामभिश्च प्रख्याताः। हेतुं = कारणमन्वीष्यैव निश्चयः क्रियते। अत इयं हेतुविद्या। नि ईयते, निश्चयेन ज्ञायते अनेन स इति न्यायः, न्यायमधिकृत्य प्रवृत्ता विद्या न्यायविद्या। तर्कं विना अर्थात् वस्तुनः स्वरूपविषये कथं किमित्यादिरूपेणोहापोहं विना तत्त्वनिर्णयः न कर्तुं शक्यः, अतोऽपीयं तर्कप्रधानाविद्या तर्कविद्या। इयमेव विद्या त्रय्यादिशास्त्राद्यनुगुणतया प्रवृत्ता सती वैदिकी न्यायविद्या सञ्जाता। या च तद्विरुद्धतया प्रवृत्ता साऽवैदिकी स्वतन्त्रा बौद्धिकी न्यायविद्याभूत्। अतः पूर्वमेकैवान्वीक्षिकीसंज्ञका विद्येयं पश्चाज्जनानां प्रवृत्त्यनुसारेण द्विविधाभूत् – एका धारा वैदिकी, सैवास्तिकी। अन्या च धारा बौद्धिकी, सैव नास्तिकत्वेन प्रसृताभूल्लोके। अत एव एतादृशं वचनं समागतम्– नास्तिको वेदनिन्दकः (मनुस्मृतिः, अ.२, श्लो.११) इत्यादिकम्। तस्मादेव वैदिकपरम्परानुयायिभिर्वेदादिशास्त्रेषु निश्चितं तत्त्वमङ्गीकृत्य प्रवर्तिता न्यायविद्यास्तिकदर्शनत्वेन सुप्रसिद्धा दृश्यते। अपरा च बुद्धिजीविभिस्तर्कपरायणैः स्वतन्त्रतया पदार्थान्वेषणाय प्रवर्तिता न्यायविद्या नास्तिकदर्शनत्वेन बौद्धादिदर्शनरूपेण प्रख्याताभूत्।

कालान्तरे प्रथमास्तिकधाराया विकासो महर्षिगौतमादिभिः सूत्रभाष्यादिग्रन्थान् विरचय्य कृतः। इयमेव धाराऽधुना न्यायशास्त्रत्वेन वा षड्ष्वास्तिकदर्शनेषु मध्ये परिगण्यते। अपरा च धारा भगवद्बुद्धादिभिः, तदनुयायिभिः, शिष्यैश्च विकासं नीता बौद्धदर्शनत्वेन नास्तिकदर्शनेष्वन्यतमाभूत्। तर्कमधिकृत्य प्रवृत्तयोरुभयोरपि परस्परं स्वसिद्धान्तं प्रवर्धयितुं खण्डनमण्डनादिकं दृश्यते, तत्तत्सिद्धान्तपरिपोषकेषु बहुषु ग्रन्थेषु।

अनुसन्धानात्मके आलेखेऽस्मिन् आस्तिकदर्शनत्वेन प्रसिद्धस्य कालान्तरे गौतमादिभिः परमर्षिभिः प्रवर्तितस्य न्यायशास्त्रस्य परम्परायां समागतेन श्रीमताभट्टाचार्यचूडामणिजानकीनाथेन विरचितां न्यायसिद्धान्तमञ्जरीमधिकृत्य समीक्षणं विधीयते।

## २. अध्ययनविधिः –

इदमनुसन्धानकार्यं मुख्यतया पुस्तकालयीयविधिमनुसृत्य कृतमस्ति। अत्र हि न्यायदर्शनस्य प्रकरणग्रन्थस्य न्यायसिद्धान्तमञ्जर्याः, तदितरन्यायसूत्रभाष्यादिग्रन्थानाञ्चाध्ययनेन प्राप्तानि तथ्यानि सङ्कलय्य प्राप्तसामग्रीणां गहनतयानुशीलनञ्च विधाय निष्कर्षः स्थापितो वर्तते। अत्र सामग्रीणामनुशीलनक्रमे यथावश्यकमागमननिगमनात्मकविधेश्च प्रयोगो विहितो विद्यते।

## ३. अनुसन्धानस्य क्षेत्रं सीमाङ्कनञ्च–

सामान्यतः पौरस्त्यदर्शनावबोधकतत्तद्दर्शनग्रन्थानामध्ययनपुरस्सरं विशेषतो न्यायदर्शनस्य प्रमाणविषयकं सूत्रभाष्यादिग्रन्थगतं लक्षणादिकञ्चाधीत्य श्रीमज्जानकीनाथशर्मविरचितस्य न्यायसिद्धान्तमञ्जरीसंज्ञकस्य प्रमाणस्वरूपनिर्धारणपरकस्य प्रकरणग्रन्थस्य समग्रविषयाँश्चानुशील्य लिखितस्यानुसन्धानात्मकस्यालेखस्यास्य विषयक्षेत्रमपि तावदेवास्ति। एकस्मिँल्लघुलेखे अन्यग्रन्थगतं प्रमाणविषयकमध्ययनमसम्भवमिति न्यायसिद्धान्तमञ्जरीमाधृत्यैवात्रानुशीलनं विहितमस्तीति तावदेवास्यानुसन्धानस्य सीमा च वर्तते।

## ४. सैद्धान्तिकपर्याधारः–

अस्यानुसन्धानस्य विषयक्षेत्रं न्याय–तदितरदर्शनप्रतिपादकानां गौतमादिमहर्षिप्रणीतानां सूत्रभाष्यादि–मूलग्रन्थानां स्वतः प्रामाणिकत्वात् तेषां सत्यापनाय सैद्धान्तिकपर्याधारस्य नास्त्यावश्यकता, तथाप्यस्मिन्नध्ययने न्यायसूत्र–भाष्यादिग्रन्थेभ्यः, तद्विवरणभूतग्रन्थेभ्यः, विशेषतो न्यायसिद्धान्तमञ्जरीग्रन्थाच्च सामग्रीसङ्कलनं कृतमस्तीति एते ग्रन्था एव कथञ्चिद् सैद्धान्तिकाधारत्वेन अङ्गीकृता इति वक्तुं शक्यते। विषयविवेचनक्रमे सङ्कलिततथ्यानां सन्दर्भस्रोतःप्रदर्शनाय गद्यात्मकाधुनिकग्रन्थानां कृते लेखकमितिपृष्ठपद्धतेः (एपीएपद्धतेः), सूत्रसन्दर्भप्रदर्शनाय च

संस्कृतवाङ्मयान्तर्गते न्याय–तदितरदर्शनेषु बहुप्रचलिताया अध्यायपादसूत्रसंख्यापद्धतेश्च प्रयोगः कृतो वर्तते।

## ५. पूर्वकार्यसमीक्षा–

तर्कप्रधानभूतस्यास्य न्यायदर्शनस्य सूत्रकारो महर्षिगौतमो वर्तते। येन न्यायसूत्राणि विरचय्य व्यवस्थितरूपेण दर्शनमिदं व्यापकीकृतम्। न्यायसूत्रोपरि श्रीमता वात्स्यायनेन विस्तृतं भाष्यं विहितम्। तदुपरि चोद्यतकरेण भारद्वाजेन न्यायवार्तिकाख्यो ग्रन्थो विरचितः। तदनु च षड्दर्शनाचार्येण श्रीमता वाचस्पतिमिश्रेण न्यायवार्तिकतात्पर्यटीका विलिखिता। तस्याञ्च तात्पर्यटीकायां श्रीमतोदयनाचार्येण तात्पर्यपरिशुद्धिरूपो ग्रन्थो लिखितः। एवंरीत्या सूत्र–तद्भाष्य–तद्वार्तिक–तत्तात्पर्यटीका–तत्परिशुद्धिरूपाः क्रमेण लिखिताः पञ्च ग्रन्था एव प्राच्यन्यायदर्शनस्य मूलभूताः। एवं सत्यपि द्वादशशताब्द्यां समागतेन श्रीमता गङ्गेशोपाध्यायेन तत्त्वचिन्तामणिनामकं विशिष्टं ग्रन्थं निर्माय पुनः अत्रैवापरा काचन नूतना धारा समारब्धा। इयमेव धारा दीधितिकारादिभिः प्रवर्तिता सती नव्यन्यायरूपेण विकसिताभूत्। अत एवाधुना सूत्रभाष्यादीनां प्रमाणप्रमेयादिषोडशपदार्थानङ्गीकृत्यविधीयमानं चिन्तनं प्राचीनन्यायत्वेन प्रसिद्धा वर्तते चेत्, गङ्गेशोपाध्यायादिभिः परिष्कारशैलीं प्रमाणप्रधानं विषयञ्चादाय प्रवर्तितं न्यायशास्त्रमिदं नव्यन्यायत्वेन सुप्रसिद्धं वर्तते। अत्रैवान्तरे प्रभूतं विस्तृतयोः प्राच्य–नव्यमतयोः समानतन्त्रभूतयोर्न्यायवैशेषिकदर्शनयोश्च प्रवेशार्थमर्थात् समग्रतया न्यायदर्शने प्रवेशार्थं जिज्ञासूनां कृते केचन प्रकरणग्रन्था लिखिताः कतिपयैः नैयायिकैः। एतेषु न्यायसिद्धान्तमुक्तावली, तर्कसङ्ग्रहः, तर्कामृतम्, न्यायसिद्धान्तमञ्जरीत्यादयः प्रसिद्धाः सन्ति। एतेषां व्याख्यानादिकञ्च बहुभिः कृतमस्ति न्यायशास्त्रे प्रवेशार्थम्। एतेषु ग्रन्थेषु प्रमाणविषयकं चिन्तनं विशेषतो वर्तते, यतोहि न्यायदर्शनमिदं मुख्यतया प्रमाणनिर्वचनपरकमस्ति। अत एव प्रमाणशास्त्रत्वेन सुप्रसिद्धिरस्ति शास्त्रस्यास्य। नैयायिकैः प्रमाणविवेचनक्रमे तदितरशास्त्रोक्तप्रमाणस्वरूपं सभेदं प्रदर्श्य खण्डितम्। तद्यथा – सांख्ययोगदर्शनादिषु विषयाकाराकारिता चित्तवृत्तिः प्रमाणम्। मीमांसायां भाट्टमतेऽगृहीतग्राहियथार्थज्ञानकरणमेव प्रमाणम्। प्राभाकरमते चानुभूतिरेव प्रमाणम्। वेदान्तेऽन्तःकरणपरिणामरूपाया वृत्तेरेव प्रमाणत्वम्। बौद्धदर्शने चाविसंवादकं ज्ञानं प्रमाणम्। जैनदर्शने च स्वपरावभासकं ज्ञानं प्रमाणमिति। नैयायिकैस्तु प्रमाकरणत्वमेव प्रमाणत्वमित्युक्तम्।

तच्च प्रमाणं प्रत्यक्षादिभेदादनेकविधम् इति सकलदर्शनानां प्रमाणविषयकं सामान्यचिन्तनं विद्यते। किन्तु प्रमाणस्वरूपस्य विशदतया निष्कृष्टतया च विमर्शो विशेषतो नैयायिकैरेव कृतोऽवलोक्यते। अत एव च न्यायशास्त्रं प्रमाणशास्त्रमिति नाम्ना प्रसिद्धम्। एवं सत्यपि प्रमाणस्वरूपविषये, तत्संख्याविषये च विवदन्ते दार्शनिकाः। केषाञ्चिन्मते प्रमितिरेव प्रमाणमस्ति चेत्, केषाञ्चित्तु प्रमितिजनकं किञ्चिदन्यदेव। ततोऽपि प्रमाणसंख्याविषये दार्शनिकाः परस्परं बहु कलहायमाना अवलोक्यन्ते। तत्र प्रसिद्धमेतत् — प्रत्यक्षैकप्रमाणवादी चार्वाकः। प्रत्यक्षानुमाने द्वे प्रमाणमिति बौद्ध–वैशेषिकादयः। प्रत्यक्षानुमानसहितेन शब्दाख्यप्रमाणेन प्रमाणत्रयमिति सांख्ययोगनैयायिकैकदेशिनः, अन्ये च केचित्। प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि इति गौतमाः, तदनुयायिनश्च। प्रत्यक्षादिप्रमाणचतुष्टयेन सहार्थापत्तिरपीति प्रमाणपञ्चकमाहत्येति केचिन्मीमांसकाः। प्रमाणपञ्चकसहितम् अनुपलब्धिप्रमाणमाहत्य षोढा प्रमाणपदवाच्यमिति अद्वैतवेदान्तिनो भाट्ट–मीमांसकाश्च। ऐतिह्यम्, सम्भवः, चेष्टा च स्वतन्त्रतया प्रमाणसंज्ञां लभन्त इति तान्त्रिकाः, ज्योतिर्विदः, पौराणिकादयश्च। (चन्द्रजसिंहः, तर्कसंग्रहपदकृत्यम्, पृ.६७)

मुक्तावल्यादिगन्थेषु प्रतिपादिते प्रमाणस्वरूप–संख्यादिविषये बहूनां विदुषां व्याख्योपव्याख्यानान्यनुसन्धानात्मककार्याणि च दृश्यते, किन्तु न्यायसिद्धान्तमञ्जरीग्रन्थस्य न तथा व्याख्यानादिकं किञ्चिल्लभ्यते, न वानुसन्धानात्मकञ्च कार्यं विहितं दृश्यते। तत्रापि प्रमाणविवेचनपरके ग्रन्थे प्रमाणपरकमनुशीलनमधुना यावन्न केनापि कृतमस्ति। अतोऽयमेव ग्रन्थोऽनुसन्धानार्थं चीतः। मन्येऽहं विविधविश्वविद्यालयेषु पाठ्यक्रमे निर्धारितस्यास्य ग्रन्थस्य समीक्षया समेषामुपकारः स्यात्।

## ६. ग्रन्थकाराभिमतं प्रमाणसामान्यस्वरूपम् –

बङ्गदेशीयेन जानकीनाथभट्टाचार्येण विरचितेऽस्मिन् ग्रन्थे प्रमाणातिरिक्तानां बहूनां विषयाणां परिचर्चा वर्तते, किन्तु ते विषयाः प्रमाणचिन्तनक्रमे प्रसङ्गतया समागता वर्तन्ते। अतः प्रमाणचिन्तनेनैव ग्रन्थस्यास्य समग्रतयाध्ययनं भवितुमर्हति।

न्यायशास्त्रमिदं प्रमाणशास्त्रत्वेनापि प्रसिद्धं वर्तते। यतोहि प्रमाणमन्तरा न किमपि पदार्थजातं यथार्थतया ज्ञातुं शक्यते। प्रमाणस्य प्राधान्यमेव सूचयति सुप्रसिद्धं वचनमिदम्– मानाधीना मेयसिद्धिः (दर्शनशास्त्रेषु

प्रसिद्धमाभाणकम्)। अत एव सूत्रकारेणापि प्रप्रथमं प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्क निर्णयवादजल्पवितण्डाहेत्वाभासच्छल– जातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः (न्यायसूत्रम्, १।१।१) इति सूत्रे प्रमाणपदं प्रोक्तम्। प्रमाणस्यैव प्राधान्यं सूचयन् भाष्यकारोऽप्याह– प्र माणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत्प्रमाणम् (वात्स्यायनः, पृ.१) इति। अत एव नव्यन्यायशास्त्रप्रवर्तकेन गङ्गेशोपाध्यायेनापि स्वकीये तत्त्वचिन्तामणिरूपे महति ग्रन्थे मूलतः प्रमाणचिन्तनमेव विहितम्। तत्र च प्रत्याक्षादीनि चत्वारि प्रमाणान्यादायैव चत्वारः खण्डाः विभक्ता वर्तन्ते – प्रत्यक्षचिन्तामणिः.....इत्यादि। तदनन्तरकालिकैर्विश्वनाथपञ्चाननभट्टाचार्यान्नम्भट्टादिभिश्च न्यायसिद्धान्तमुक्तावल्यां तर्कसङ्ग्रहादिषु च प्रमाणमादायैव चतुरो खण्डान् विभज्य ग्रन्था निर्मिताः। इयमेव परिपाट्यनेन जानकीनाथशर्मणा च विहिता वर्तते। अतो ग्रन्थेऽस्मिन्नपि चत्वारः खण्डाः वर्तन्ते – प्रत्यक्षपरिच्छेदः, अनुमानपरिच्छेदः, उपमानपरिच्छेदः, शब्दपरिच्छेदश्च।
ग्रन्थादौ मङ्गलाचरणं विधाय ग्रन्थकारः प्रमाणसामान्यं निरूपयति। तत्त्वज्ञानस्य निखिललोकविमोक्षमुख्योपायं मत्वा तदर्थं प्रमाणमावश्यकं नावश्यकमिति कथयन्नाह – तच्च प्रमाणाधीनमित्यादि। प्रमाणसामान्यं लक्षयति – तत्र प्रमायाः करणं प्रमाणमिति (जानकीनाथः पृ.५) प्रमाणलक्षणे प्रमाशब्दस्यानुप्रवेशात् तल्लक्षयति – प्रमा च यथार्थानुभव इति। तत्र याथार्थ्यञ्च तद्वति तदवगाहित्वम्। यथा रजते इदं रजतमिति ज्ञानं रजतत्ववति तदवगाहि भवतीति यथार्थमस्ति। एवमेव प्रमाणसामान्यलक्षणे करणपदस्यापि सत्त्वात् तन्निर्वक्ति – करणत्वञ्च व्यापारवदसाधारणकारणत्वम् (जानकीनाथः पृ. ८)। व्यापारस्य तज्जन्यत्वे सति तज्जन्यजनको भवति।

### ७. प्रमाणभेदाः

प्रमाणसामान्यस्य लक्षणं सपदकृत्यं परिभाष्य तद्भेदं सूत्रकारोक्त सूत्रं प्रदर्शयन् वदति – तच्च प्रमाणं चतुर्विधमित्याह भगवान्सूत्रकारः – प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि (आचार्यः गौतमः, न्यायसूत्रम् १–१–३)। ग्रन्थस्यास्य प्रमाणनिर्वचनं मुख्यो विषयः। अत एव ग्रन्थकारेण प्रमाणसामान्यं विविच्य तद्भेदानां प्रत्यक्षानुमानोपमानशब्दानां निर्वचनाय चत्वारः परिच्छेदाः संयोजिताः। एष्वेकैकं प्रमाणं सलक्षणं सोदाहरणं सभेदञ्च विस्तृततया विविक्तमस्ति।

### ७.१ ग्रन्थदिशा प्रत्यक्षविवेचनम्

प्रकरणेऽस्मिन् प्रमाणसामान्यस्वरूपं सलक्षणं सपदकृत्यं सभेदञ्च प्रदर्श्य ग्रन्थकारः प्रत्यक्षलक्षणं कथयति – तत्र साक्षात्काररूपप्रमाकरणं प्रत्यक्षम्। एतल्लक्षणघटकसाक्षात्कारं परिभाषयति – साक्षात्कारत्वञ्च साक्षात्करोमीत्यनुभवसाक्षिको जातिविशेषः। अत्र प्रसङ्गेवैशिष्ट्यानवगाहिज्ञानं साक्षात्कार इत्येवं नास्तिकमतं प्रदर्श्य खण्डयति – तन्न, बाधकं विना भ्रान्तित्वायोगादित्यादिना। एतदनन्तरं साक्षात्कारस्य द्वैविध्यं प्रदर्शयति – स च साक्षात्कारो द्विविधः – नित्योऽनित्यश्च। भगवतो ज्ञानं नित्यम्, तदतिरिक्तमस्मदीयमनित्यम्। तत्राप्यस्मदीयमनित्यमपि निर्विकल्पकसविकल्पकभेदेन द्विविधम्। तत्र वैशिष्ट्यानवगाहिज्ञानं निर्विकल्पकम्, निष्प्रकारकं ज्ञानं वा। अस्मिन् विषये गहनेक्षिकया चिन्तनं विधाय सप्रकारकज्ञानं निर्वक्ति – वैशिष्ट्यावगाहि(ज्ञानम्) सप्रकारकं वा ज्ञानं सविकल्पकमिति। सकिल्पकज्ञाने च विविधानि मतानि प्रदर्श्य ग्रन्थकारस्तत्करणकं प्रत्यक्षप्रमाणञ्च द्वेधा वर्तत इति कथयन्नाह – तच्च प्रत्यक्षमिन्द्रियात्मकं द्वेधा – द्रव्यग्राहकं तदग्राहकञ्च। तत्र द्रव्यग्राहकाणि – चक्षुस्त्वङ्मनांसि त्रीणीन्द्रियाणि, तदग्राहकं घ्राणं रसनं श्रवणञ्च भवति। विषयेऽस्मिन्नपि पूर्वपक्षिभिराक्षिप्तानां मतानां समाधानं विधाय, कस्येन्द्रियस्य किं ग्राहकत्वं कथञ्चेत्यपि स्पष्टयति। अत्रैव प्रसङ्गे मीमांसकमतं वैशेषिकमतञ्च प्रदर्श्यखण्डयति – वैशेषिकास्तु समवायो न प्रत्यक्षः........ परमाण्वादेरयोग्यत्वादित्याहुः, तन्न, तथा हेतुतायां मानाभावात्। महत्त्वसमानाधिकरणोद्भूतस्य गन्धस्य तद्गतसामान्यस्य तयोः समवायस्य च घ्राणयोग्यता। तथैव महत्त्वसमानाधिकरणोद्भूतस्य रसस्य तद्गतसामान्यस्य, तयोः समवायस्य च रसनेन्द्रिययोग्यता वर्तते। तथैव शब्दस्य, तद्गतजातेः, तयोः समवायस्य च श्रवणेन्द्रिययोग्यता वर्तत इति एतैरिन्द्रियैरेव विषयाः प्रत्यक्षा भवन्तीति (जानकीनाथः पृ. ३२) प्रकरणेऽस्मिन् प्रतिपादितमस्ति।
ततश्चेन्द्रियजन्यप्रत्यक्षानुभवार्थं सन्निकर्षाः सहकारिणो भवन्ति। ते च सन्निकर्षाः षड्विधाः – संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति। एवञ्च केन सन्निकर्षेण किं गृह्यत इत्यप्यत्र प्रतिपादयति – द्रव्यं संयोगेन, शब्देतरगुणः कर्म द्रव्यगताजातिश्च

संयुक्तसमवायेन, शब्देतरगुणकर्मगताजातिः संयुक्तसमवेतसमवायेन, शब्दः समवायेन, शब्दगताजातिस्तु समवेतसमवायेन, विशेषणतया विशेष्यतया च समवायाभावौ प्रत्यक्षीक्रियन्ते। घटाभाववद् भूतलमित्यत्रेन्द्रियसन्निकृष्टे, भूतले घटाभावस्य विशेषणत्वात् तत्स्वरूपमेव सम्बन्धो भवति। तथैव भूतले घटाभाव इति बोधे घटाभावस्य विशेष्यत्वात् तत्स्वरूपमेव सम्बन्धो भवति। अत्रैव प्रसङ्गेऽन्धकारास्थानां घटादिद्रव्याणां कथं चक्षुषा नोपलब्धिरित्येवमाशङ्क्य समाधत्ते – चक्षुषा द्रव्यग्रहे महदुद्भूतरूपालोकसंयोगः सहकारी, न चान्धकारस्थघटे सोऽस्ति।

अत्र प्रकरणे समवायाभावाख्ययोः पदार्थयोरेवासत्त्वमाशङ्क्य खण्डयति – स्यादेतत्, विशेषणता न प्रत्यासत्तिः, समवायाभावयोरसत्त्वादित्यादिग्रन्थमाध्यमेन। अयं घटः रूपवान्, अयं चलतीति प्रत्यक्षमेव घटत्वरूपचलनसम्बन्धविषयकं समवाये(समवायसत्त्वे) मानमस्ति। तथैव घटो नास्तीति प्रतीत्याऽभावपदार्थस्यापि सिद्धिर्भवतीति कथयति ग्रन्थकारः – न चाभावोऽसन्, घटो नास्तीति प्रतीत्या तत्सिद्धेः। अत्रैवाभावस्याधिकरणस्वरूपत्वं प्राभाकरीयं मतं पूर्वपक्षत्वेन सम्यक्प्रदर्श्य खण्डयति – तथैवात्र घटो नास्तीति प्रतीत्या यदि घटाभावो स्वीक्रियते, तर्हि घटाभावो नास्तीति घटाभावाभावोऽपि स्वीकर्तव्यो भवेत्। एवञ्च तस्याप्यभावः पुनः स्वीकार्यो भवेत्। एवञ्चानवस्थानदोषप्रसङ्गादित्यादिविषयमादाय समाधानञ्चात्र विहितमस्ति। अस्यैवाभावस्य द्वैविध्यञ्च प्रकटयति – संसर्गाभावोऽन्योऽन्याभावश्चेति। संसर्गाभावोऽपि त्रिविधः – प्रागभावप्रध्वंसाभावात्यन्ताभावभेदात्। तत्र नास्तीत्यनुभवसिद्धो नित्यः, संसर्गाभावोऽत्यन्ताभावः। विनष्ट इति प्रतीतिसाक्षिक उत्पत्तिमानाभावो ध्वंसः। भविष्यतीत्यनुभवसाक्षिको विनाश्यभावः प्रागभावः। एतत्त्रिविधाभावभिन्नः, इदमेतद्भिन्नमिति प्रतीतिसाक्षिकोऽभावः – अन्योऽन्याभावः। एतादृशानां चतुर्णामिप्यभावानां स्वरूपं लक्षणञ्च सोदाहरणं निरुच्य, अन्येषां च मतानां प्रदर्शनं विधाय, तत्खण्डयित्वा च मनसोऽणुत्वं नास्तीति मीमांसकमतं प्रदर्श्य खण्डयति। अत्र मीमांसकाः – मनो नाणुः, किन्तु विभुः .........तन्न, विभुत्वे आत्मना संयोगानुपपत्तेरित्यादिना (जानकीनाथः पृ. ५९)।

### ७.१.१ प्रत्यक्षप्रमाणानुशीलम्–

अत्र प्रत्यक्षपरिच्छेदे प्रमाणसामान्यलक्षणं विविच्य प्रसङ्गात् प्रमास्वरूपं करणस्वरूपञ्च निर्धारितमस्ति। इन्द्रियजन्यज्ञानस्यैव प्रत्यक्षप्रमास्वरूपात्, तज्जनकेन्द्रियादीनां भेदात्, फलरूपा प्रत्यक्षप्रमाऽपि घ्राणजादिभेदेन बहुविधा भवति। यथा घ्राणेन्द्रियजन्यं प्रत्यक्षं घ्राणजम्, चक्षुरिन्द्रियजन्यं चाक्षुषम्, रसनेन्द्रियजन्यं रासनम्, त्वगिन्द्रियजन्यं त्वाचम्, श्रोत्रेन्द्रियजन्यं श्रौत्रम्, मनोरूपान्तरेन्द्रियजन्यञ्च प्रत्यक्षं मानसं भवति। एवं प्रत्यक्षा प्रमा षड्विधा वर्तते। तथैवेन्द्रियार्थयोः सन्निकर्षेणैव प्रत्यक्षानुभवो जायते। ते च सन्निकर्षाः संयोगादिभेदेन षड्विधाः भवन्ति। एवं संयोगादिसन्निकर्षभेदेनापि प्रत्यक्षानुभवो भिद्यत इति वक्तुं शक्यते। यथा घटादिद्रव्यप्रत्यक्षं संयोगजम्, तद्वृत्तिरूपप्रत्यक्षं संयुक्तसमवायजम्, घटसमवेतरूपादिवृत्तिरूपत्वादिजातिप्रत्यक्षं संयुक्तसमवेतसमवायजम्, तथैव शब्दप्रत्यक्षं समवायसन्निकर्षजन्यम्, तद्गतशब्दत्वजातिप्रत्यक्षं समवेतसमवायजन्यम्, एवं भूतलवृत्तिघटाभावादिप्रत्यक्षञ्च विशेष्यविशेषणभावसन्निकर्षजन्यं भवतीति सन्निकर्षभेदेनापि प्रत्यक्षं भिद्यत इति वक्तुं शक्यते।

प्रत्यक्षमिदं सविकल्पकनिर्विकल्पकभेदेनापि द्वैविध्यं भजते। तत्र यस्मिन् प्रत्यक्षे गोत्वादिविशेषणसहितं गोव्यक्तिरनुभूयते तत्सप्रकारकं सविकल्पकं प्रत्यक्षमुच्यते। यच्चेन्द्रियस्य विषयग्रहणकाले प्रप्रथममेकक्षणे यत्किञ्चिदिदमित्येवमात्रं ज्ञायते, नतु तत्र धर्मधर्मिभावोऽनुभूयते। तत्तादृशं ज्ञानं निष्प्रकारकं निर्विकल्पकं भवति। एवञ्चाहत्य प्रकरणेऽस्मिन् प्रत्यक्षप्रमास्वरूपं तत्करणभूतमिन्द्रियादिकमिन्द्रियप्रमयोर्मध्ये विद्यमानः सन्निकर्षाख्यो व्यापारः सम्यक्तया विश्लिष्टो वर्तते।

### ७.२ ग्रन्थकारोक्तमनुमानस्वरूपम्

प्रत्यक्षनिरूपणानन्तरं क्रमप्राप्तमनुमानं प्रतिपादयति – अथानुमानं निरुपयतीत्यादिना। तत्रानुमितिकरणमनुमानम्। अनुमितित्वञ्च अनुमिनोमित्यनुभवसिद्धो जातिविशेषः। एवमनुमितित्वस्य लक्षणं विधाय तस्य पदकृत्यञ्चोक्त्वा तस्या अनुमितेः करणरूपानुमानप्रमाणं किमिति प्रश्नं विधाय समाधत्ते ग्रन्थकारः। किमिदं तत्करणमिति चेत् – व्याप्तिविशिष्टपक्षधर्मताघटकलघुपदार्थज्ञानमिति गृहाण। अत्रैव प्रसङ्गे व्याप्तिस्वरूपं प्रदर्शयति। तत्र च साध्याऽत्यन्ताभाववृत्तित्वमित्यादिकं व्याप्तिस्वरूपं प्रदर्श्य,

अव्याप्त्यतिव्याप्त्यादिदोषाणां सम्भवेन सिद्धान्तव्याप्तिस्वरूपं कथयति – अत्रोच्यते इत्यादिना। साध्यसामानाधिकरणस्वसमानाधिकरणयावत्कत्वं व्याप्तिः। ………… यत्समानाधिकरणा यावन्तः साध्यसमानाधिकरणाः, तत्त्वं व्याप्तिरिति यावत्। यथा धूमसमानाधिकरणा यावन्तो वह्निसमानाधिकरणा भवन्तीति धूमे वह्निव्याप्तिर्भवति, न तु वह्नौ धूमस्य। अत्र व्याप्तिः ग्रहीतुमेव न शक्यते। किञ्चिद् धूमसमानाधिकरणं वह्न्यसमानाधिकरणं भविष्यतीति शङ्काया दुर्वारत्वादिति चार्वाकमतं प्रदर्श्य खण्डयति, अत्रोच्यते इत्यादिना। व्यभिचारग्रहविरहादिकमेव व्याप्तिग्राहकं भवति। न तच्छङ्का विरहो दुःशङ्क्यः, क्वचित्तर्कात्, क्वचित्तन्मूलभूतव्याप्त्यादौ कोटिस्मरणाद्यभावादपि तन्निवृत्तेः। यतोहि व्यभिचारशङ्काकोटिस्मृतिर्वा न ह्यस्ति। एवं व्याप्तिस्वरूपं निरूप्यानुमानस्य त्रैविध्यं प्रदर्शयति ग्रन्थकारः – तच्चानुमानं त्रिविधम् – केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिभेदादित्यादि। तत्र केवलान्वयिसाध्यकानुमानं केवलान्वयि। असत्पक्षः केवलव्यतिरेकी। एतदुभयादन्यदन्वयव्यतिरेकि। एवमनुमानत्रैविध्यं प्रदर्श्य हेत्वाभासान् निरूपयति ग्रन्थकारः (जानकीनाथः पृ. ९९)।

हेतुवदाभासन्ते इति हेत्वाभासाः। वस्तुतः हेतौ विद्यमानानां सर्वेषां गुणानामभावेऽपि कतिपयधर्मसत्त्वेन हेतुवदाभासमानाः सन्तोऽनुमानेऽयथार्थज्ञानमुत्पादयन्ति। अत एतेषां स्वरूपं ज्ञात्वैव वास्तविकानुमानं ज्ञातुं शक्यते। अतोऽत्र हेत्वाभासा अपि निरूप्यन्ते। तत्र सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिता हेत्वाभासाः। तत्र प्रथमस्त्रिविधः – साधारणासाधारणानुपसंहारिभेदेन। तत्र साध्यवदन्यवृत्तित्वं साधाणत्वम्। यथा धूमवान् वह्नेः इत्यत्र वह्निः। साध्यव्यापकीभूताभावप्रतियोगित्वमसाधारणत्वम्। इदमेव सपक्षव्यावृत्तत्वमित्यपि कथयन्ति। अस्योदाहरणन्तु शब्दो नित्यः शब्दत्वादिति। तथैव अवृत्तिसाध्यहेत्वन्यतरत्वम्, अवृत्तिसाध्यकत्वं वानुपसंहारित्वम्। यथा आकाशवान् धूमात्……… इत्यादौ। साध्यासमानाधिकरणत्वं विरुद्धत्वम्, यथा गौरश्वत्वादिति। पक्षे साध्यधीप्रतिबन्धकः परामर्शः सत्प्रतिपक्षः। यथा – जलमुष्णं स्पर्शवत्वात्, नेदमुष्णमतेजस्त्वादित्यादि। असिद्धिस्तु व्यभिचाराद्यन्यपरामर्शप्रतिबन्धकतावच्छेदकरूपवत्वम्। सा च त्रिविधा स्वरूपासिद्याश्रयासिद्धिव्याप्यत्वासिद्धिभेदेन। तत्र पक्षे हेत्वभावः स्वरूपासिद्धिः, यथा घटः पृथिवी पटत्वादिति। पक्षे पक्षतावच्छेदकासिद्धिराश्रयासिद्धिः, यथा गगनकमलं सुरभि कमलत्वादिति। एतदुभयभिन्नासिद्धिर्व्याप्यत्वासिद्धिः, यथा धूलिपटले धूमनिष्ठव्याप्त्यभावः। पक्षे साध्यशून्यत्वं बाधः, यथा जलादिपक्षे वह्न्यभावः।

एतच्चानुमानं परार्थं न्यायपूर्वकं भवति। न्यायश्च क्रमिकप्रतिज्ञादिपञ्चकसमुदायः। अयम्भावः – प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवा भवन्ति न्यायस्य। अत एतत्पञ्चावयववानां समुदाय एव न्यायपदवाच्यः। एतेषां प्रयोगेणैव परोऽप्यनुमिनोति। अत एव न्यायदर्शनेऽस्य महत्त्वं विशेषतो वर्तते। मञ्जरीकारेणात्राप्यनुमाननिरूपणप्रसङ्गे एतेषां पञ्चावयवानां स्वरूपं सोदाहरणं प्रदर्शितमस्ति। तद्यथा – पर्वतो वह्निमानिति प्रतिज्ञा। धूमादिति हेतुः। यो यो धूमवान् स स वह्निमानित्युदाहरणम्। वह्निव्याप्यधूमवानयमित्युपनयः। तस्मात् वह्निमानिति निगमनम्।

### ७.२.१ अनुमानप्रमाणानुशीलनम्

प्रकरणेऽस्मिन् अनुमितिकरणरूपस्यानुमानप्रमाणस्य स्वरूपनिर्धारणायानुमितेर्लक्षणम्, अव्याप्त्यतिव्याप्त्यादिदोषरहितं प्रतिपाद्य तत्करणरूपमनुमानं निष्कृष्टम्। अत्र प्रकरणे मीमांसकानां केवलान्वयिसाध्यकानुमानं न भवति, तथैव सौगतानां केवलान्वयिनि साध्यवदन्यदलीकमेव असत्ख्यातिसिद्धमित्यादिविविधमतानि प्रदर्श्य खण्डनं विहितमस्ति। व्याप्तिस्वरूपविषये बहूनि मतानि प्रदर्श्य निष्कृष्टं व्याप्तिस्वरूपं साध्यसमानाधिकरणस्वसमानाधिकरणयावत्कत्वमिति प्रोक्तम्। अत्रैव चार्वाकोक्त व्याप्तिग्रहणाशक्यत्वं प्रदर्श्य तत्समाधानमपि विहितम्। मीमांसकीयं व्याप्यतावच्छेदकप्रकारकं पक्षधर्मताज्ञानं सहकारीति मतं प्रदर्श्य व्याप्यत्वप्रकारकपक्षधर्मताज्ञानमेवानुमितौ हेतुर्भवतीति साधितम्। केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिभेदेनानुमानस्य त्रैविध्यमुपपाद्य तदुदाहरणानि च सम्यक्प्रदर्शितम्। अत्रैव प्रसङ्गे पक्षतास्वरूपमपि प्रदर्शितम्। सिषाधयिषाविरहविशिष्टसाध्यनिश्चयाभावः पक्षता इत्येवं सैद्धान्तिकं पक्षतास्वरूपं स्वीकृत्य पूर्वपक्षिभिराक्षिप्तानां दोषाणां समाधानं विहितम्। एतदनन्तरं ग्रन्थकारेण सूत्रभाष्यादिभिः प्रोक्तानां हेत्वाभासानां निरूपणं विहितम्, किन्तु सूत्रकारेणोक्तेषु सव्यभिचार–विरुद्ध–प्रकरणसम–साध्यसम–कालातीतेषु मध्ये प्रकरणसम–साध्यसम–कालातीताख्यानां त्रयाणां स्वरूपमवान्तरकालिकैर्नव्यनैयायिकैः संशोध्य सत्प्रतिपक्ष–असिद्ध–बाधितेतिसंज्ञया व्यवहारः कृतः। तदेवमनेनापि ग्रन्थकारेण परिष्कृतमिदं नव्यमतमेव स्वीकृतम्। अत एव

सत्प्रतिपक्षासिद्धबाधितशब्दैरेव त्रयाणां कथनं तन्निर्वचनञ्च विहितं दृश्यते। वस्तुतस्तु शब्दभेदेऽपि न तावानधिकोऽर्थभेदोऽत्र वर्तत इति ध्येयम्। एवमन्त्येऽनुमानप्रकरणस्य प्रधानभूतस्य न्यायरूपस्य प्रतिज्ञाद्यवयवपञ्चकसमुदायस्य स्वरूपं सोदाहरणं प्रदर्शितमस्ति। अन्येषु ग्रन्थेष्ववयवस्वरूपं पूर्वमुक्त्वानुमानप्रकरणान्ते हेत्वाभासा निरूपिताः सन्ति। किन्त्वत्र ग्रन्थे हेत्वाभासानन्तरं प्रकरणान्तेऽवयवस्वरूपं विचारितमस्तीति विशेषोऽयं दृश्यते।

### ७.३ जानकीनाथोक्तमुपमानस्वरूपम् –

प्रत्यक्षानुमानयोः स्वरूपं प्रदर्श्योपमानाख्यं प्रमाणं निरूपयति – अथोपमानं निरूपयतीत्यादिना (जानकीनाथः पृ. १२२)। उपमितित्वञ्च – उपमिनोमित्यनुभवजातिविशेषः। तत्करणञ्च सादृश्यज्ञानम्। तथाहि गवयपदवाच्यं किञ्चिदस्तीति ज्ञानतो विशिष्यापरिचिन्वानः कीदृशो गवयपदवाच्येति कश्चित् पृच्छति। तेन च गोसदृशो गवयपदवाच्य इत्युक्त्वा सन् विपिनमनुसरन्, यदा गोसदृशं पिण्डं पश्यति तदा पूर्वानुभूततादृगतिदेशवाक्यार्थस्मरणं परिच्छिनत्ति – अयं गवयशब्दवाच्य इति। सेयमुपमितिर्भवति। न ह्येतत् प्रत्यक्षं भवितुमर्हति, चक्षुरादिव्यापारविगमेऽपि जायमानत्वात्। नाप्यनुमितिः, व्याप्तिज्ञानाद्यभावेऽप्युत्पत्तेः। नापि शाब्दम्, गवयत्वविशिष्टोपस्थापकपदाभावात्। न वेयं स्मृतिः, पूर्वमननुभवात्। अतोऽरिक्तैवेयमुपमितिः। सादृश्यज्ञानाद् यथोपमीयते, तथैव वैधर्म्यज्ञानादप्युपमितिरुत्पत्तेः। अस्योपमानस्य द्वैविध्यं प्रतिपादयन्ति नैयायिकाः।

### ७.३.१ उपमानप्रमाणानुशीलनम्

उपमाननिरूपणप्रसङ्गे ग्रन्थकारेणोपमानसामान्यलक्षणमुक्त्वा तत्फलस्योपमितिरूपानुभवस्य लक्षणं कृतमस्ति। इयमुपमितिर्न शब्दजन्या, न वेन्द्रियादिजन्या, न च व्याप्तिज्ञानादिजन्या किन्त्वियं स्वतन्त्रा सादृश्यज्ञानजन्या विलक्षणा एव। एवंरीत्योपमितिरूपानुभवस्य पृथक्प्रमात्वं निर्धार्य तत्करणरूपस्योपमानप्रमाणस्यापि पृथक्प्रमाणत्वं संसाधितं ग्रन्थकारेण। अन्ते सादृश्यज्ञानादिव वैधर्म्यज्ञानादप्युमितिरुत्पद्यत इत्येवं सोदाहरणं प्रदर्शितम्।

### ७.४ ग्रन्थकृदभिमतं शब्दप्रमाणस्वरूपम्

तत्र शाब्दप्रमितिकरणं शब्दः। शाब्दत्वञ्च शब्दात्प्रत्येमीत्यनुभवजातिविशेषः। शक्तिग्रहस्य सहकारित्वं शाब्दबोधे स्वीक्रियते। तत्र सङ्केतो नाम अस्मात्छब्दादयमर्थो बोद्धव्य इत्याकारिकेच्छा। सा चेश्वरसङ्केतरूपा। अत एव अपभ्रंशे न शाब्दबोधः, तर्हि कथं तत्र तेन लोकव्यवहार इति चेत् शक्तिभ्रमादिति गृहाण। अयञ्चेश्वरसङ्केतः कथं गृह्यते ? इति चेत्, व्यवहारादिना। कस्य पदस्य कस्मिन्नर्थे शक्तिरित्यत्र नैयायिकपद्धतिमनुसृत्य ग्रन्थकारः जात्याकृतिव्यक्तिषु शक्तिरिति प्रतिपादयति। अत्रान्येषां मीमांसकादीनां मतं प्रदर्श्य विस्तरेण खण्डितमस्ति। प्रसङ्गादत्रान्विताभिधानवादस्य, अभिहितान्वयवादस्य च चर्चाऽपि विहिता वर्तते।
शब्दशक्तिरियं वृत्तित्वेन सहकारिणी भवति। सा च वृत्तिर्शक्तिलक्षणान्यतररूपा। लक्षणापि गौणीशुद्धाभेदेन द्विविधा। एवं समस्तेषु पदेषु कुत्र कथं शक्तिरिति निर्धार्य मीमांसकादिमतञ्च खण्डितमस्ति विस्तरेण प्रकरणेऽस्मिन्। व्यञ्जनाया वृत्त्यन्तरत्वं खण्डयति ग्रन्थकारः – व्यञ्जना च न वृत्त्यन्तरम्, लक्षणैव तदर्थसिद्धिः...........(जानकीनाथः पृ. २०१)। प्रकरणेऽस्मिन्नेव प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधस्य स्वरूपं सिद्धान्तयन् मीमांसकस्य भावनामुख्यविशेष्यकशाब्दबोधम्, वैयाकरणस्य व्यापारमुख्यविशेष्यकशाब्दबोधञ्च विस्तरेण युक्तिपूर्वकं खण्डयति ग्रन्थकारः। अत्रैव प्रसङ्गे आकाङ्क्षायोग्यतासत्तीनां शाब्दबोधे कारणत्वञ्च प्रदर्शितमस्ति। तच्च सामान्यकारणमिति ज्ञेयम्। अयं शब्दो विध्यर्थवादभेदेन द्विविधः। अत्रापि विविधानि मतानि निरूप्य खण्डितमस्ति। विधिरपि त्रिविधो भवति– अपूर्वविधिः नियमविधिः परिसंख्याविधिश्चेति। तत्र प्राचीनाचार्योक्तं प्रमाणं प्रदर्शयति –

विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति।
तत्र चान्यत्र च प्राप्ते परिसंख्येति कीर्त्यते।।
(जानकीनाथः, पृ. २६०) इति।

विधिभिन्नोऽर्थवादोऽपि त्रिविधो भवति – गुणवादः, अनुवादः, भूतार्थवादश्चेति। तदुक्तम् –

विरोधे गुणवादः स्यादनुवादोऽवधारिते।
भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः।।
(जानकीनाथः पृ. २७३)

शब्दस्य ध्वनिरूपस्यानित्यत्वं स्वीक्रियते नैयायिकैः। तदेवमनुवदत्यत्रापि – सोऽयं शब्दोऽनित्यः। उत्पन्नो गकारो विनष्टो गकार इति प्रतीतेः (जानकीनाथः पृ. २७३)। अत्र प्रसङ्गे नित्यशब्दवादीनां मीमांसकानां वैयाकरणाञ्च मतं प्रदर्श्य खण्डितमस्ति। एवमेव शब्दप्रमाणं निरुच्य

ग्रन्थान्तेऽर्थापत्यादीनां प्रमाणान्तरत्वं निषिद्ध्यति। अयम्भावः – अर्थापत्यादीनामन्यदर्शनेष्वतिरिक्तप्रमाणतया स्वीकृतानामप्येतेषु चतुर्ष्वेव प्रमाणेष्वन्तर्भावः कर्तुं शक्यते। अतो न चतुर्भ्योऽधिकं किञ्चित् स्वतन्त्रं प्रमाणं भवितुमर्हतीति।

### ७.४.१ शब्दप्रमाणानुशीलनम्

शब्दपरिच्छेदेऽस्मिन् ग्रन्थकारेण शब्दप्रमाणस्य लक्षणं शाब्दप्रमितिकरणरूपं प्रथममुक्तम्। तत्र शाब्द इत्यस्य शाब्दबोधः, शाब्दीप्रमा, शाब्दीप्रमितिर्वेत्यर्थो भवति। अयमेव शाब्दानुभवः, इत्यपि वक्तुं शक्यते। लोके परस्परान्वितशब्दसमूहेन वाक्यभावापन्नेनैव अर्थबोधो जायते। अतः तादृशार्थबोधकस्य वाक्यरूपस्य शब्दस्येव प्रमाणत्मस्तीति ज्ञेयम्। ग्रन्थकारेणापि शाब्दबोधलक्षणं विधाय तत्पदकृत्येनाव्याप्त्यादिदोषाः परिहृताः। अत्रैव प्रसङ्गे वैशेषिकानामनुमानविधयैव शाब्दबोधो जायत इति, न शब्दः स्वतन्त्रं प्रमाणमित्येवमुक्त्वा नैयायिकमतेन शब्दस्य स्वतन्त्रतया प्रामाण्यं संशाधितम्। अत्रैव प्रसङ्गे कस्य पदस्य कुत्र शक्तिः, कथञ्च तेनैव पदेन सोऽर्थः ज्ञायते ? इत्येवमाशङ्क्य शक्तिग्रहणप्रकारः प्रदर्शितः। स च अस्मात्पदादयमर्थो बोद्धव्यः, इत्येवमिच्छारूपः। तत्र व्यवहारेणैव प्रप्रथमं शक्तिग्रहो भवतीति संसाध्य घटपटादि पदस्य कस्मिन्नर्थे शक्तिरर्थात् घटादिपदं जातिरूपमर्थमुत व्यक्तिरूपमर्थ बोधयति ? इत्येवमाशङ्क्य जातिविशिष्टव्यक्तौ पदस्य शक्तिः वर्तत इति निर्धारितमस्ति। प्रसङ्गेऽस्मिन्नेव अन्विताभिधानवादस्य, अभिहितान्वयवादस्य च चर्चा विहिता वर्तते। मीमांसकीयमन्विताभिधानवादं खण्डयित्वा नैयायिकोक्तोऽभिहितान्वयवादपक्षोऽत्र सम्यक् स्थापितो वर्तते। अत्रैव शक्तिलक्षणान्यतररूपया वृत्त्या अर्थबोधो जायत इत्येवमुक्त्वा लक्षणायाः गौणीशुद्धाभेदेन द्वैविध्यं प्रतिपाद्य समासादिस्थलेषु लक्षणया शाब्दबोधः कथं भवतीति सोदाहरणं विस्तृततया प्रतिपादितमस्ति। एवमेव प्रसङ्गादागतं मीमांसकादिमतञ्च खण्डयित्वा व्यञ्जनादीनां वृत्त्यन्तरत्वञ्च निषिद्धम्। तथैव वाक्यार्थजन्यशाब्दबोधे वाक्यघटिते कस्य पदस्यार्थः प्राधान्येन भासत इत्येवं चिन्तयन् 'व्यापारमुख्यविशेष्यकशाब्दबोधः' भवतीति वैयाकरणमतं 'भावनामुख्यविशेष्यकशाब्दबोधो जायते' इति मीमांसकमतञ्च सयुक्तिकं खण्डयित्वा 'प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधः' नैयायिकोक्तः समर्थितो वर्तते। एवञ्चान्ते आकाङ्क्षायोग्यतासत्तीनां शाब्दबोधे कारणं प्रदर्श्यविधिवादञ्च प्रदर्श्य ध्वनिरूपशब्दस्यानित्यत्वं संसाधितम्।

एवञ्च ग्रन्थेऽस्मिन् चतुर्णां प्रमाणानां स्वरूपं सलक्षणं निर्धारितमस्ति। तत्रैव प्रसङ्गादागता विषयाश्च चर्चिताः सन्ति। तेन ग्रन्थस्यास्याध्ययनेन नैयायिकोक्तं प्रमाणसामान्यस्वरूपं तद्विशेषप्रत्यक्षादिचतुर्विधप्रमाणस्वरूपञ्च निष्कृष्टतयावबोद्धुं शक्यते। अतोऽयं ग्रन्थः प्रमाणपदार्थज्ञानायात्यन्तमुपयोगि वर्तत इति न कोऽपि सन्देहावसरः।

## ८. उपसंहारो निष्कर्षश्च –

श्रीमता जानकीनाथशर्मणा विरचितेऽस्मिन् न्यायसिद्धान्तमञ्जरीग्रन्थे न्यायदर्शनस्य मूलभूतः प्रमाणपदार्थो निरूपितो वर्तते। ग्रन्थस्यास्यानुशीलनेन ज्ञायते यत् – न्यायदर्शनस्य प्रमाणपदार्थविवेचनपरतया तज्ज्ञानेनैव तदितराणां प्रमेयाणामपि स्वतः ज्ञानं कर्तुं शक्यत इत्येवं मत्वा प्रमाणातिरिक्तानां प्रमेयादिपदार्थानां विषये न काऽपि चर्चा लेशितोऽपि विहिताऽस्ति। तथैव प्रायो न्यायप्रकरणग्रन्थेषु न्यायदर्शनस्य प्रमाणपदार्थम्, वैशेषिकदर्शनस्य सप्तपदार्थाञ्चादाय विवरणं दृश्यते, किन्तु न तद्वदत्रास्ति। ग्रन्थेऽस्मिन् न कुत्रापि सप्तपदार्थानां तदवान्तरद्रव्यगुणादीनाञ्च लक्षणादिकं विहितमस्ति। तेन च प्रमाणमात्रस्य विषये जिज्ञासावतां जनानां कृतेऽध्ययनाय सौकर्यं भवति, प्रमाणस्वरूपस्य तद्भेदानां प्रत्यक्षादीनाञ्च सम्यक्रूपेण विश्लेषणात्। तथापि न्यायवैशेषिकोभयदर्शने प्रविविक्षूणां कृते त्वयं प्रकरणग्रन्थोऽपूर्णः प्रतिभाति। समेषां विषयाणां दिग्दर्शनं विना तत्तत्सूत्रभाष्यादि ग्रन्थेषु प्रवेष्टुमशक्यत्वात्। एवञ्चाहत्य निष्कर्षेण वक्तुं शक्यते यत् – न्यायदर्शनस्य सामान्यपरिचयानन्तरं प्रमाणविषयकगहनचिन्तनार्थमेवायं ग्रन्थ उपयोगी वर्तते। अत्र प्रमाणसामान्यस्य तद्विशेष प्रत्यक्षानुमानोपमानशब्दप्रमाणाञ्च स्वरूपं सलक्षणं सभेदञ्च विश्लिष्टमस्ति। अतो नायं सर्वथानुपयोगीति वक्तुं शक्यते। परन्तु ग्रन्थस्यास्य प्रायः शतवर्षेभ्यः पूर्वं कदाचित् केनचिदेकदैव सम्पादितत्वात्, प्रकाशितत्वाच्चाध्ययनाय काठिन्यमनुभूयते। व्याख्यानमप्येकमेव तत्र प्रकाशितमस्ति। तच्च प्राचीनप्रकाशनपद्धतिमनुसृत्य प्रकाशितमस्तीति मूलस्य व्याख्यानस्य च वाक्यानां पङ्क्तीनां वा पूर्वापरभावोऽन्वयादिकञ्च कर्तुं कठिनमस्ति। अनेन लघ्वनुसन्धानेन किञ्चिदेव जिज्ञासूनामध्येतृणां छात्राणां सहयोगो भविष्यतीत्यपेक्षमाण एतत्सम्पादनकार्ये सहयोगं विदधद्भ्यः सर्वेभ्यो धन्यवादान् समर्प्य विरमामि।

## ९. सन्दर्भग्रन्थसूची


1. गौतमः. *न्यायदर्शनम्,* वात्स्यायनभाष्यसंवलितम्, बौद्धभारतीप्रकाशनम् इ.सं.१९९८।

2. भट्टः, अन्नम्. *तर्कसंग्रहः,* दीपिकादिव्याख्यासहितः (तृ. सं.), सं.श्रीकृष्णवल्लभाचार्यः, व्यासप्रकाशनम् इ.सं. ....।
3. भट्टाचार्यः, चूडामणिश्रीजानकीनाथः. *न्यायसिद्धान्तमञ्जरी,* न्यायमञ्जरीसाराख्यटीकया सहिता,
4. श्रीयादवाचार्यः (व्या.), मास्टरखेडालीलाल संकटा प्रसाद संस्कृत पुस्तकालय।
5. भट्टाचार्यः, विश्वनाथः. *न्यायसिद्धान्तमुक्तावली,* किरणावलीव्याख्योपेता, कृष्णवल्लभाचार्यः,
6. चौखम्बासंस्कृतसंस्थानम्, इ.सं. १९९५।
7. मिश्रः, केशवः. *तर्कभाषा,* हिन्दीव्याख्योपेता, गजानन शास्त्री 'मुसलगाँवकर' (सं.), चौखम्बा विद्याभवन, इ.सं.२००३।